# गुरु–अष्टकम्

शरीरं सुरूपं सदा रोगमुक्तं

यशश्चारु चित्रं धनं मेरुतुल्यम् ।

गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम् ।। १ ।।

कलत्रं धनं पुत्रपौत्रादि सर्वं

गृहं बान्धवा सर्वमेतद्धि जातम् ।

गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम् ।। २ ।।

षडङ्गादिवेदो मुखे शास्त्रविद्या

कवित्वं च गद्यं च पद्यं करोति

गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम् ।। ३ ।।

विदेशेषु मान्यः स्वदेशेषु धन्यः

सदाचारवृत्तेषु मत्तो न चान्यः ।

गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम् ।। ४ ।।

क्षमामण्डले भूपभूपालवृन्दैः

सदा सेवितं यस्य पादारविन्दम् ।

गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम् ।। ५ ।।

यशो मे गतं दिक्षु दानप्रतापाज्जगद्वस्तु

सर्वं करे यत्प्रसादात् ।

गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम् ।। ६ ।।

न भोगे न योगे न वा वाजिमेधे

न कान्तासुखे नैव वित्तेषु चित्तम् ।

गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम् ।। ७ ।।

अरण्ये न वा स्वस्य गेहे न कार्ये

न देहे मनो वर्तते मे त्वनर्घ्ये ।

गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम् ।। ८ ।।